श्रीगणेशायनमः॥अथविसोन्खुरुजदावलतुरकीराजा॥विसांकयंत्रविधिः॥यस्यकस्यचिन्नृपा
र्थंचित्तंभवेच्चेत्तर्हिप्रथमंकाद्यंत्रेपूर्यते॥अथमंत्रोयथा॥ओं ह्रां श्रीं क्लीं अमुकंवशंकुरुकुरु
स्वाहा॥इतिमंत्रंप्रतियंत्रंपठन्सन्यंत्राणिलिखेत्॥खदिरपाक ३ इतिमंत्रंत्रिवारंपठित्वानदीज
लेयंत्राणिमुंच्येत्एवंकृतेसतियंत्राणितरंतिसंतिनदीजलेगच्छेयुः एवंद्वादशसहस्रेषु १२०००
यंत्रेषुनदीजलेमुक्तेषुसत्सुकार्यसिद्धिर्भवेत्॥इतिप्रथमांकविधिः॥१॥लाभार्थधनार्थचिंतंचे
त्तर्हिद्वितीयांकाख्यंत्राणिपूरयेत्॥पूर्वमंत्रबीजचतुष्कंपठित्वाममममनोरथंपूरयपूरयस्वाहा॥इदं
मंत्रप्रतियंत्रेएकवारंखदिरपाक ३ त्रिवारपठित्वानदीप्रवाहेमुंचेत्॥प्रथमदिनाद्द्वितीयतृतीय
दिनादौयंत्राणिवृध्यालिखेत्॥एवंसर्वप्रयोगेषुपुरश्चरणेषुप्रथमदिनाद्यंत्राणिवृध्यालिखेत्॥
अस्मान्न्यूनानलिखेत्॥एवंद्वादशसहस्राणि १२००० यंत्राणिलिखेत्॥इतिद्वितीयांकविधिः॥२॥
यतःकुत्रचित्स्थानाद्यस्यकस्यचिद्वस्तुआनयनार्थंइच्छाभवतिचेत्तर्हितृतीयांकाख्यंत्राणिप्रथमदि
नाद्द्वितीयतृतीयदिनादौवृध्यालिखेत्॥नदीप्रवाहेप्रथमदिनेयंत्रप्रक्षेपेपूर्वोक्तमंत्रमुच्चार्यममम
नोरथंपूरयपूरयस्वाहा॥इत्येकवारंखदिरपाक ३ इतित्रिवारंचप्रतियंत्रेपठित्वायंत्राणितरंप्रतिदि
नेप्रवाहेमुंचेत्॥एवंद्वादशसहस्र १२००० पर्यंतलिखेत्सिद्धिः॥इतितृतीयांकविधिः॥३॥ ॥अ
थकस्यचिद्गृहंशून्यंकर्तुमिच्छेत्तर्हिचतुर्थांकाद्वृध्यायंत्राणिलिखेत्॥मंत्रोयथापूर्वबीजचतुष्ट
मुच्चार्यअमुकंगृहंभोच्चयमोच्चयस्वाहा॥इमंमंत्रंपठित्वाखदिरपाक ३ त्रिवारंपठित्वाचतुर्विंशति
अधिकत्रिसहस्राणियंत्राणिलिखित्वा ३०२४॥दीपशिखायांदाहयेत्॥ततोभस्मसंचयंकृत्वायस्य
गृहोपरिक्षिप्तंतस्यगृहंशून्यंभवेत्॥इतिचतुर्थांकविधिः॥४॥ ॥कस्यचिदुच्चाटनकर्तुमीच्छति

चेत्तर्हि षष्ठांकवध्या यंत्राणि पूर्येत मंत्र पूर्वबीज ॐ अमुकं मम शत्रुं क्षयं कुरु कुरु स्वाहा ॥ खदिर
पाक ३ इति त्रिरूर्वं ॥ इति षष्ठांकविधिः ॥ ॥ स्त्रियं वशीकर्तुमिच्छा चेत्तर्हि सप्तमअंकादियंत्राणि पूर्य
ते अयं मंत्रः पूर्वबीज चतुष्कं अमुकीं मम वशीं कुरु कुरु स्वाहा ॥ खदिरपाक ३ इति मंत्रं त्रिवारं पठित्वा
यंत्राणां प्रवाह जले मुच्यते ॥ अष्टोत्तरसहस्रं यंत्रैः स्त्री वश्या भवंति ॥ इति सप्तमांकविधिः ॥ ॥ चेद्य
द्रव्यं स्वं तिष्ठेत्तर्हि अष्टमांकवध्या यंत्राणि पूरयेत् ॥ मंत्रं पूर्वबीजं चतुष्कं मम मनोरथान् पूरय पूरय त्रुं
स्वाहा ॥ अष्टोत्तरशतानि यंत्राणि लिखित्वा खदिरपाक ३ त्रिर्जपित्वा अग्नौ प्रज्वालयेत् ॥ तेन शत्रोः श्री
रं रेहेत् ॥ गृहनाम्ना गृहं दहेत् धनयंत्रात् सौभाग्यं निश्चयं भवेत् ॥ गुह्यं रक्षेत् प्रसिद्धं न कुर्यात् ॥ बहुमुखेय
दि भवेत्तर्हि मंत्रनाम पूर्वाभावे पुनः पठेद्य इच्छा चेत्तर्हि अष्टांकावध्या यंत्राणि लिखेत् ॥ इति अष्टमांक
विधिः ॥ ॥ धनयंत्रप्राप्ति इच्छा चेत्तर्हि नवांकावध्या यंत्राणि १००८ लिखित्वा इति नवमांकविधिः
॥ ॥ अथ यंत्रलेखनमुहूर्तो यथा ॥ हस्तार्कवा मूलार्कतः नवरात्रतः दीपावली एतावंती सध्धी यो
गा यदि भवेत्तर्हि लेखनारंभः कार्यः ॥ कच्छवध्या नदीतीरे उपविश्य अमुकनाम्ना मंत्रं पठित्वा खदि
रपाक ३ इति त्रिवारमुच्चार्य एकं यंत्रं वहति जले मुक्त्वा ब्रह्मचर्येण तिष्ठेत् ॥ रूक्षाणि न खादेत् ॥ या
वयंत्रं प्रथमदिने लिखेत्तेभ्यः प्रतिदिनमधिकं लिखेत् ॥ तेभ्यो न्यूनाधिकं न लिखेत् ॥ तेन महत्सु
खं लभेत् ॥ अनया रीत्या एकलक्षमशीति सहस्रं नवशतं नवाधिकनवति १८०९९ संख्याकं लि
खेत् ॥ ततश्चतुर्णां पुरुषागमार्थं दीपोत्सविरात्रौ लोहपात्रं कृत्वा उभौ लग्नौ भूत्वा द्वे संपूर्ण चतुष्को
णसहिते एकैकस्मिन् प्रविष्टता द्वेऽ लोहपात्रे चतुष्कोणेषु चतस्रो वर्तयः तिष्ठेत् ताद्दशं कृत्वा अधः
पात्रे मध्ये यंत्रं स्थापयेत् ॥ ततश्चतुरो दीपान् कुर्यात् ॥ तेन चत्वारः पुरुषः आगच्छेत् ॥ ततो साधकं य

दुयात्तद्वचनं चत्वारः पुरुषाः कुर्युः॥ मूलं ओं ह्रीं श्रीं क्लीं मम वांछितं देहि देहि स्वाहा॥ जपस्य दशांशो
होमः॥ मधुघृतशर्कराभिः॥ तद्दशांशेन ब्राह्मणभोजनं॥ ग्रहणकाले तथा दीपोत्सवस्य रुद्रस्य चतुर्दश्यां
मंत्रोच्चारं कुर्यात्॥ यंत्रसिद्धिर्भवेत्॥ ॥अथ प्रयोगो यथा॥ कुंकुमेन लिखेद्यंत्रं राजा वश्यो भवेदि
ह॥ श्वेतखदिरेण लिखेद्दुराचं नृपवशंगतः॥ निलिन्यायीदलिखेच्छत्रुस्तंभनं कारयेत्ततः॥ रोचनाकुंकुमेन
स्वर्णेन जयति निश्चितं॥ नद्यास्तीरोत्थेन तस्मात्तं लिखेद्यंत्रं जितेंद्रियः॥ ग्रामशून्यं भवेन्नूनं सर्वे व्रजंति मा
नवाः॥ लिखेद्यंत्रं अष्टगंधेन बंधमुक्तिर्भवेद्ध्रुवं॥ शिशोः कंठे तु बध्नीयात् मृतो जीवेच्चतायुषः॥ धरा
पृष्ठे लिखेद्यंत्रं मेकादशशतानि च॥ मनोप्सितं भवेद्यस्य उद्यमं महति ध्रुवं॥ धत्तूरपत्रतोयेन का
करक्तेन वा लिखेत्॥ अर्कपत्रोपरि धीमान् साधकं भवति ध्रुवं॥ कृष्णमार्जाररक्तेन लिखित्वा साध
कोत्तमैः॥ गर्त्तं कृत्वा ग्राममध्ये यंत्रं क्षिप्त्वा प्रपूरयेत्॥ रजोभिः पूरितो गर्त्तो महत्कष्टं भवेत्पुरे॥ घुघुरक्ते
न विलिखेत्स भावन्नृपालितस्सणात्॥ गोरोचनागोरक्तेन भूर्जपत्रे समालिखेत्॥ मस्तके धारयेद्धी
मान् स्मशाने यास्तिष्ठति॥ भूतप्रेतपिशाचेभ्यो नायाति तस्य हृदयः॥ गोरोचनासिंदूरेण लिखित्वा ध
रणीतले॥ काकपक्षे तु लेखन्या रामा वश्या भवेद्ध्रुवं॥ शृगालरक्ते भूर्जे तु लिखित्वा यदि साधकः॥
चत्वर्परी तु बध्नीयात्पश्येद् भगतं धनं॥ ॥इति विसाकविधिः॥ ॥चंदनागरुह्रीवेरकुष्ट
उशीरं कुंकुमसैंव्यकं॥ जटामांसिमूरमांसि विशोगंधाष्टकं स्मृतं॥१॥ ॥चंदनागरुकर्पूरचोरकुंकुम
रक्तचंदं॰ रोचनां॥ जटामांसिकपियुतान्शक्तिगंधाष्टकं स्मृतं॥२॥ ॥चंदनागरुकर्पूरतमालजलकुंकुमं॥कु
सीतं कुष्टसंयुक्तं शैवगंधाष्टकं स्मृतं॥३॥ ॥स्वरूपचंदनं चैव रोचनागरुमेव च॥ मदं मृगद्वयोद्भूतं कस्तूरीचं
द्रसंयुतं॥४॥ अष्टगंधविनिर्दिष्टं गाणेशास्य महाविभो॥५॥ ॥चंदनागरुकस्तूरीरक्तचंदनचर्चितं॥कुंकुमं

॥ यंत्र

विसा सुरदारुश्च कुशश्क सुगंधकं॥ ॥इतिविसाकयंत्रसंपूर्णं॥

